**Journal of Interdisciplinary and Multidisciplinary Research (JIMR)**
E-ISSN:1936-6264| Impact Factor: 5.886|
Vol. 11 Issue 10 Oct 2016
Available online at: https://livejimrjournal.in/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

# प्रत्ययवाद

**डॉ. अशोक कुमार झा**
व्याख्याता–व्याकरण
राजकीय धूलेश्वर आचार्य संस्कृत महाविद्यालय
मनोहरपुर (जयपुर)

विश्वस्मिन् अस्मिन् सर्वप्रथमं वाक्यार्थविवेचनार्थं संस्कृतभाषायामेव भूयांसः श्रेयांस उपायाः प्रादुरभूवन्। ते च उपाया मुख्यतया द्वयो मौलिक्यो र्धारयोर्विभक्ता भवन्ति। तत्र प्रथमा धारा वाक्येभ्यः पदानाम् अपोद्धार इति नाम्ना विद्वन्मण्डले प्रसिद्धा विद्यते। अपरा च धारा पदानि एव सम्भूय वाक्यरूपम् आदधति इति।

तत्र प्रथमधारायाः पोषकं दर्शनं व्याकरणशास्त्रमेव विद्यते। द्वितीयधारायाश्च पोषकं न्यायदर्शनं पूर्वमीमांसादर्शनञ्च विद्यते। तत्र वाक्येभ्यः पदोद्धारवादिनां वैयाकरणानाम् अयं तर्को भवति यत् वस्तुगत्या परमार्थतो वा पदानां किमपि स्वतन्त्रम् अस्तित्वं नैव विद्यते। तदुक्तम्, वैयाकरणशिरोमणिना आचार्येण भृर्तहरिणा वाक्यपदीये–

**पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।**
**वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन।।**[1]

अयं तदाशयो वाक्यमेव कंचन अपूर्वं पूर्णं निराकाङ्क्ष बोधं जनयति। तस्मात् वाक्यम् एकम् अनवयवं च वस्तुतो विद्यते। एवं सिद्धान्तिते सहसा मनसि इदमवतरति यत् यदा पदानां प्रकृतीनां प्रत्ययानां च वैयाकरणमते का गतिः स्यादिति। तत्र तैः समाहितं यत् आवापोद्वापाभ्यां पदपदार्थयोः प्रकृतिप्रत्ययोस्तदर्थयोश्च कल्पना करणीया शास्त्रीयप्रक्रियानिर्वाहायेति। लोके तु वाक्यतामापन्नेन केनचन पदेन अर्थस्य नैव जायते परिसमाप्तिः, का कथा प्रकृतिप्रत्ययोः।

द्वितीयस्या धारायाः पोषकाणां नैयायिकपूर्वमीमांसकानाम् अयं तर्को यत् पदानि विहाय वाक्यस्य अपरं किमपि स्वतन्त्रं स्वरूपं नैव भवति। अपितु पदानाम् एव समूहो वाक्यं सम्पद्यते पदानि एव वाक्ये अर्थान् समर्पयन्ति। अतएव पदापेक्षया वाक्यस्य नास्ति किमपि स्वतन्त्रम् अस्तित्वम्। तथा च एकस्मिन् मते पदानि प्रकृतयः प्रत्याश्च काल्पनिकतां भजन्ते। अपरस्मिन् मते च पदानि प्रकृतयः प्रत्ययाख्य वास्तविकतां समुद्वहन्ति।

[1] वाक्यपदीयम् ब्रह्मकाण्डम् 73 कारिका।

Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 5.886|
Vol. 11 Issue 10 Oct 2016
Available online at: https://livejimrjournal.in/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

तथैव वाक्यार्थसम्पत्तये पदानां प्रकृतीनां प्रत्ययानां च विमर्शो महता आडम्बरेण तत् तच्छास्त्रविशेषज्ञैः कृतो विद्यते। तेषु कृत्तद्धितप्रत्ययानां विवेचनमपि तत् तच्छास्त्रेषु विशदं विद्यते। तेषां समेषां साधारणे एकस्मिन् शोधप्रबन्धे नास्ति समावेशः सम्भवः। तथापि स्थालीपुलाकन्यायेन तेषाम् आचार्याणां विवेचनं विधातुं प्रयते। तत्र व्याकरणशास्त्रं नितान्तं प्राचीनं विद्यते। व्याकरणशास्त्रस्य प्रमाणभूतेन आचार्येण्या पतंजलिना स्वकीये महाभाष्ये व्याकरणशास्त्राध्ययनस्य प्रयोजनप्रदर्शनावसरे–चत्वारि श्रृङ्गा,[2] चत्वारि वाक्,[3] उत त्वः[4] सक्तुमिव[5] सुदेवोऽसि[6] इति मन्त्रपंचकस्य निर्देशः कृतो विद्यते। अथ च तन्मन्त्राणां व्याकरणशास्त्रपरकव्याख्या च तेन कृता विद्यते। आचार्यपतंजले बहुप्राचीनेन निरुक्ताचार्येण आचार्ययास्केन चाऽपि चत्वारि वाक् इति इति मन्त्रस्य व्याकरणशास्त्रपरकव्याख्या कृता विद्यते। नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः इत्यादिना।[7] एवमेव व्याकरणशब्दो यस्मात्धातो र्निष्पद्यते तस्य मौलिकार्थे प्रयोगे यजुर्वेदे समुपलभ्यते।[8]

अतो निःसंदेहं वक्तुं शक्यते यत् उपलब्धवैदिकपदपाठरचनातः पूर्वमेव व्याकरणशास्त्रं पूर्णतां गतम् आसीत्। प्रकृतिप्रत्ययानाम् ऋक्प्रत्ययनां धातूपसर्गाणां समासघटकपूर्वोत्तरपदानां च विभागः पूर्णरूपेण निर्धारित आसीत्।

वाल्मीकीयरामायणेन विज्ञायते मर्यादापुरुषोत्तमस्य भगवतो राघवेन्द्रस्य रामभद्रस्य समये एव व्याकरणशास्त्रं सुव्यवस्थितं पठनपाठनयोग्यं सम्पन्नमासीत्। तदुक्तम्, तेन–

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**
**बहुव्याहरतानेन न किंचिदपभाषितम्।।[9]**

तत्र हनुमतो वाक्पाटवं युक्तियुक्तमेव आसीत्। हनुमतः पितुः वायोरपि व्याकरणशास्त्र–विशारदत्वात्। तदुक्तम्, वायुपुराणे।[10] निरुक्ताचार्येण यास्केन चापि व्याकरणप्रवक्त् नाम् अनेकेषां वैयाकरणानाम् उल्लेखः कृतो विद्यते।

---

2 ऋ. – 4/58/3
3 तत्रैव – 1/164/45
4 तत्रैव – 10/71/4
5 तत्रैव – 10/71/2
6 तत्रैव – 8/99/12
7 निरूक्तम् – 13/9
8 युजर्वेद 19/77 – दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः। इत्यादिना।
9 वाल्मीकिरामायणम् किष्किन्धा.–3/29
10 वायुपुराणम् – 2/44

Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 5.886|
Vol. 11 Issue 10 Oct 2016
Available online at: https://livejimrjournal.in/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

यथा– **न सर्वाणीति गार्ग्यो वैयाकरणानां चैके।**[11]

इत्यादिना–

सर्वाणि नामानि धातुजानीति प्रदर्शयता शाकटायनाचार्येण स्वव्याकरणं यास्कपूर्वं निर्मितम् आसीदिति सूचितम्। यथा–

**अनुशाकटायनं वैयाकरणाः, उपशाकटायनं वैयाकरणाः।**[12]

**तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च।।**[13]

पाणिनीयव्याकरणमहाभाष्यकृता पतंजलिना चापि अत्यन्तप्राचीनकाले व्याकरण–शास्त्रस्य पठनपाठनप्रचलनं सूचितं विद्यते। आतेऽनेकेषां प्रमाणनां सद्भावेन सुस्पष्टं वक्तुं शक्यते व्याकरणशास्त्रम् अत्यन्तप्राचीनकालिकम् उत्पन्नं विद्यते।

तदुक्तम्, महाभाष्यकृता–

**पुराकल्प एतदासीत्, संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते।**[14]

इत्यादिना–

अतः शब्दशास्त्रकृते व्याकरणशब्दप्रयोगो वाल्मीकिरामायणे [15] गोपथब्रह्मणे [16] मुण्डकोपनिषदि [17] महाभारतादौ समुपलभ्यते। तदुक्तम् व्यासेन महाभारते–

यथा–

**सर्वार्थानां व्याकरणाद् वैयाकरण उच्यते।**

**तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा।।**[18]

---

[11] निरूकम् – 1/12
[12] काशिका – 1/4/86,87
[13] निरूकम् – 1/12
[14] महाभाष्यम् – अ.1.पा.1.आ.1.
[15] रामायणम् – किष्किन्धा, – 3/29
[16] गो.ब्रा.पू. – 1/24
[17] मुण्डको – 1/5
[18] महाभारतम् ड़ोग – 42/60

Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 5.886|
Vol. 11 Issue 10 Oct 2016
Available online at: https://livejimrjournal.in/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

एवमेव शिक्षाव्याकरणनिरुक्तच्छन्दः कल्पज्योतिषकृतषङ्गशब्दस्य वेदांगतया प्रयोगो गोपथब्राह्मणे[19] बौण्धायनधर्मसूत्रे[20] रामायणादौ[21] च दीदृश्यते।

संस्कृतव्याकरणशास्त्रेतिहासकृता युधिष्ठिरमीमांसकेन न केवलं व्याकरणशास्त्रस्य प्राचीनत्वं संसाधितम्, प्रत्युत पाणिनीयव्याकरणशास्त्रे स्मृतानाम् अनेकासाम् अन्वर्थसंज्ञानाम् अतिप्राचीनत्वं प्रदर्शितम्।

यथा गोपथब्राह्मणे–

**ओङ कारं पृच्छामः, को धातुः किं प्रातिपादिकं,**
**किं नामाख्यातम्, किं लिंगं, किं वचनं, का विभक्तिः,**
**कः प्रतययः, कः स्वर उपसर्गो निपातः, किं वै व्याकरणं,**
**को विकारः, को विकारी, कतिमात्रः, कतिवर्णः, कत्यक्षरः,**
**कतिपदः, कः संयोगः, किं स्थाननादानुप्रदानानुकरणम्... ।**[22]

एवमेव मैत्रायणसंहितायां[23] वैयाकरणप्रसिद्धविभक्तिसंज्ञोल्लेखः कृतो विद्यते। तथैव ऐतरेयब्राह्मणे[24] विभक्तिरूपेण सप्तधा विभक्ताया वाण्या–उल्लेखो विद्यते। अतो व्याकरणशास्त्रस्य प्राचीनताविषये एतन्निर्देष्टुं शक्यते मूलवेदातिरिक्त यत् किमपि भारतीयं वैदिकवाङ्मयं सम्प्रति समुपलभ्यते। तत्र सर्वत्र व्याकरणशास्त्रस्य उल्लेखो विद्यते। तत्र व्याकरणशास्त्रस्य प्रथमः प्रवक्ता ब्रह्मैवास्ति।

तदुक्तम्, ऋक्तन्त्रकृता–

**ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय,**
**भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः ।**[25]

इत्यादिनाः

---

[19] षडङ्गविदस्तत् तथा धीमहे–गो.ब्रा.पू.–1/27
[20] बौधा. धर्म.–2/14/2
[21] रामा. बाल. 14/21 नाषडङ्विदत्रासीन्नाव्रतो नाबहुश्रुतः।
[22] गो.ब्रा.पू. – 1/24
[23] मेत्रायणसंहिता – 1–7–3
[24] ऐतरेय ब्राह्मणे – 71–7
[25] ऋक्तन्त्रम् – 1/4

Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 5.886|
Vol. 11 Issue 10 Oct 2016
Available online at: https://livejimrjournal.in/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

ब्रह्ममणःसकाशात् बृहस्पतिः, बृहस्पतेरिन्द्रः, इन्द्राद् भरद्वाज, भरद्वाजाद् ऋषयः, ऋषिभ्यश्च ब्राह्मणा इति क्रमेण व्याकरणशास्त्रम् अधीतवन्तः।

महाभाष्यकृता पतंजलिनाचापि स्वकीये महाभाष्ये पश्पशाह्नके प्रतिपादितम्, यत्–

**''बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्त्रं प्रतिपदोक्तानां**

**शब्दानां शब्दपारायणं प्रोवाच।''**[26]

इत्यादिना–

तंत्र महाभाष्यस्य व्याख्याकृता भर्तृहरिणा प्रतिपादितम् शब्दपारायणशब्दोऽयं रूढिशब्दः कस्यचित् ग्रन्थस्य बोधको विद्यते। ततो विज्ञायते बृहस्पते र्व्याकरणशास्त्रस्य नाम शब्दापारायणम् आसीत्। शब्दपारायणस्य व्याकरणशास्त्रस्य प्रतिपदपाठरूपेण अध्यापनं बृहस्पतिना इन्द्राय कृतम्। तत्र प्रतिपदपाठस्वरूपं नैव ज्ञायते। सम्भवति नाम्नामाख्यातादीनां च शब्दानां संग्रहरूपं किमपि पुस्तकं भवितुमर्हति। अद्यत्वेऽपि रामादिशब्दानां कतिपय–धात्वादीनां रूपाणि बालकान् अध्यापयितुं तत् संग्रहग्रन्थो विरच्यते। अतः प्रतिपदपाठरूपेण व्याकरणाध्ययनस्य परम्परा पूर्वम् आसीत्।

न्यायमंजरीकृता जयन्तभट्टेन बृहस्पतिवचनं–

**प्रतिपदमशक्यत्वाल्लक्षणस्याप्यव्यवस्थितत्वात्**

**तत्रापि स्खलितदर्शनाद् अनवस्थाप्रसंगाच्च**

**मरणान्तो व्याधिव्याकरणमिति औशनसा।।**[27]

इति निर्दिष्टं विद्यते।

ततः प्रतीयते ओशनसशास्त्राध्येतृणां मते व्याकरणं मरणान्तव्याधिरूपं पूर्वम् आसीत्। किन्तु बृहस्पतिशिष्येण इन्द्राचार्येण प्रतिपदापाठद्वारा शब्दोपदेशस्य दुरूहताम् अनुभूय तेन पदेषु प्रकृतिप्रत्ययादिविभागाद्वारा शब्दोपदेशप्रक्रियाः प्रकल्पिताः। अतएव पतंजलिनापि निर्दिष्टं बृहस्पतेः सकाशात् प्रतिपदपाठेन शब्दान् पठन् इन्द्रो व्याकरणशास्त्रस्यान्तं नैव जगाम। तैत्तिरीयसंहितायामपि–

**वाग्वै पराच्यव्याकृतावदत्।**

**ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति...**

[26] महाभाष्यम्, पश्पशाह्निकम् – 1/1/1

[27] न्यायामञ्जरी, पृ.418.

Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 5.886|
Vol. 11 Issue 10 Oct 2016
Available online at: https://livejimrjournal.in/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

**तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् ।**[28]

इति प्रतिपादितं विद्यते। तद् व्याख्याकृता सायणाचार्येण–

तामखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्ययविभागं सर्वत्राकरोत् ।[29]

इति प्रतिपादितम्।

अतोऽपि ज्ञायते पूर्वं व्याकरणसंबद्धप्रकृतिप्रत्ययादिसंस्काररहितानि अखण्डपदवाक्य'रूपाणि व्याकरणशास्त्राणि आसन्। तदध्ययनाध्यापनप्रणाल्यां क्लेशं विभागव्यैव इन्द्राचार्येण प्रकृतिप्रत्ययादिसंस्कारद्वारा शब्दानां व्याकरणं निर्माय प्रचारितम्। ततोऽपि विज्ञातुं शक्यते पूर्वम् अखण्डानां शब्दानाम् एवं व्याकरणरूपेण अध्ययनम् अध्यापनं च प्रारब्धम् आसीत्। शनैः शनैः प्रकृत्यखण्डानां शब्दानां व्याकरणप्रक्रिया रचिता विद्यते। तत् एवं प्रत्ययवाद इन्द्रकृत इति व्याकरणशास्त्रेहिहासकृता युधिष्ठिरेण प्रतिपादिम्। अतः पाणिनीयेऽष्टके व्याकरणशास्त्रप्रवक्तॄणाम् अनेकेषाम् आचार्याणाम् उल्लेखो विद्यते। व्याकरणशास्त्रेतिहासकृता युधिष्ठिरमीमांसकेन पाणिनेः प्राग्वर्तिनां पंचाशीतेः व्याकरण्याप्रवक्तॄणाम् आचार्याणाम् उल्लेखः कृतो विद्यते।

**ब्राह्मामैशानमैन्द्रं च प्राजापत्यं बृहस्पतिम्।**
**त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टमम्।।**
**इन्द्रश्चन्द्रः काशकृत्सनापिशलीशाकटायनः।**
**पाणिन्यमरजैनेन्द्रा चयन्त्यष्टादिशाब्दिकाः।।**

इत्यादिपद्यैः विज्ञायते ब्राह्मम् ऐशानम् अर्थात् शैवं तथा ऐन्द्रं प्राजापत्यं बार्हस्पत्यं त्वाष्ट्रम् आपिशलं पाणिनीयं व्याकरणम् अष्टविधम् आसीत्। किं वा ऐन्द्रं चान्द्रं काशकृत्स्नम् आपिशलं शाकटायनं पाणिनीयम् अमरसिंहकृतं शब्दानुशासनरूपममरव्याकरणं जैनेन्द्रव्याकरणम् अष्टविधम् आसीत्।

तथैव रामायणे उत्तरकाण्डे नवविधानां व्याकरणानाम् उल्लेखो विद्यते। किन्तु संस्कृतव्याकरणशास्त्रं ब्रह्मण आरम्भ पाणिनिपर्यन्तम् अनेकविधं संजातम्। किन्तु व्याकरण–शास्त्रस्यैतत्सुदीर्धपरम्पराया ऐतिहासिकः केन्द्रविन्दुः आचार्यपाणिनिरेव विद्यते। आचार्यपाणिने–रुदयकाले संजाते व्याकरणशास्त्रस्य सर्वम् अस्तित्वं व्याकरणशास्त्रस्य सर्वस्वम् आचार्यपाणिनेः अष्टाध्यायीव्याकरणग्रन्थे एव समाहितम् अभूत्। आचार्यपाणिनिना स्वपूर्ववर्तिनां समेषाम् एवं व्याकरणसम्प्रदायानां मन्थनं विधाय वैज्ञानिकपद्धत्या स्वकीये अष्टकग्रन्थे निवेशः कृतो

[28] तैत्तिरीयसंहिता 6/4/7
[29] ऋग्भाष्य उपोद्घात्, पृ.26 पूनासंस्करण भाग–1

Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 5.886|
Vol. 11 Issue 10 Oct 2016
Available online at: https://livejimrjournal.in/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

विद्यते। अतः पाणिनेरुत्तरं व्याकरणशास्त्रस्य याः का अपि शाखा पल्लविता अभूवन् तासां शाखानां मूलोद्मस्थानं पाणिनीयव्याकरणमेव विद्यते। अतो व्याकरणशास्त्रस्य ऐतिहासिकम् अध्ययनं गवेषणात्मकं च कार्यक् आचार्यपाणिनिमेव केन्द्रं मत्वा प्रस्तोतव्यं भवति। प्राकपाणिनि–पाणिनि पाणिन्युत्तरक्रमेण व्याकरणशास्त्रस्य आचार्यपरम्परां मत्वा व्यारकरणशास्त्रक्षेत्रे विकासचर्चा क्रियते। तत्र पाणिनेः प्राक् प्रायः त्रयोविंशतिर्वैयाकरणाः सन्ति, यथा इन्द्रः वायुः, भरद्वाजः, भागुरिः, पौष्करसादिः, चारायणः, काशकृत्स्नः, वैयाघ्रपदः माध्यन्दिनि, रौढ़ि, शौनकः, गौतमः, व्याडिः, आपिशलिः, काश्यपः, गार्ग्यः, गालवः, चाक्रवर्मणः, भारद्वाजः, शाकटायनः, शाकल्यः, सेनकः स्फोटायनश्चेति। एतेषामपि वैयाकरणानां श्रेणीद्वयं विद्यते। तत्र प्रथमश्रेण्यां ते वैयाकरणाः सन्ति ये पाणिनेः प्राक्वर्तिनः सन्ति। किन्तु तेषां नामानि पाणिनिव्याकरणे नोपलभ्यन्ते। किन्तु द्वितीयश्रेण्यांते वैयाकरणाः सन्ति, येषां नामोल्लेखः पाणिनिना स्वव्याकरणे कृतो विद्यते। एतत् दृष्ट्या पूर्वोक्तेषु वैयाकरणेषु व्याडिपर्यन्तं त्रयोदशवैयाकरणाः प्रथमश्रेण्यां सन्ति। तदनन्तरं दशवैयाकरणा द्वितीयश्रेण्यां सन्ति। किन्तु तेषां कालक्रमः पूर्वं पश्चाद् वा भवितुमर्हति। वस्तुतो व्याकरणशास्त्रे बृहस्पतिप्रवर्तिते प्रकृतिप्रत्ययादिविभाग–संस्कारकर्तुः इन्द्रस्त महत्त्वं सर्वेरेव स्वीकरणीयम् भवति। भाषाविचाराणाम् अभिव्यक्तेः प्रतिनिधिर्भवति। किन्तु भाषाविचाराणां क्षेत्रं सर्वदा एकसदृशं नैव भवति। अद्यत्वे यथा अस्माकं विचाराः सन्ति तदभिव्यक्तये भाषापि प्रबला विद्यते। किन्तु प्रारम्भकाले भाषाया नासीत् तथा पौढ़िः। अतो भाषाक्षेत्रं विचारक्षेत्रं च सदैव विकासशीलं विद्यते। एवं च भाषाविचारतारतम्यं तदितिहासं च बध्नाति व्याकरणशास्त्रम्। वस्तुतो व्याकरण–शास्त्रस्य स्वतन्त्रम् एव अस्तित्वं विद्यते। अथ च व्याकरणशास्त्रं सर्वाङ्गपूर्णं शास्त्रं विद्यते। तत्रापि संस्कृतभाषा व्याकरणशास्त्रस्य स्वकीया अनेकविधा पद्धतिश्चिन्तनस्य विद्यते। अतः संस्कृतभाषाया व्याकरणानि अनेकविधानि सन्ति। भारतीयवाङ्मयाध्ययनानुशीलनाभ्यां विज्ञायते ब्रह्मण आरम्भ्य इन्द्रादिदेवपर्यन्तं ज्ञानवताम् ऋषिमहर्षीणां काले च व्याकरणशास्त्रस्य विभिन्नावीथयः प्रकाशिता बभूवुः तत्र गार्ग्यगालवशाकटायनशाकल्यादिसंस्कृतभाषाशास्त्रिद्वारा प्रवर्तितस्य व्याकरणशास्त्रस्य सर्वस्वं पाणिनिकात्यायनपतंजलिहस्तेषु समागतम्। भाषायां वृहत्स्वरूपं तत्कालिकभारतस्य कोटिकोटिजनताकण्ठेषु समागतम् आसीत्। तत् सर्वम् अनेन मुनित्रयेण स्वस्वकृतौ संग्रथितम्। तत्र आचार्य पाणिनेरष्टाध्यायीसूत्राणि सन्ति। आचार्यकात्यायनस्य वार्तिकानि सन्ति, आचार्यपतंजलेश्च व्याकरणमहाभाष्यं विद्यते। एतेषां पाणिनिकात्यायन–पतंजलीनां कृतीनां सद्भावादेव तदुत्तरं भूयोभिर्वैयाकरणैः स्ववार्तिकवृत्त्यिाख्याटीकाद्वारा व्याकरणज्ञानम् उत्तरोत्तरं विकासितम्।